रात ० मत्सराहतधियोनन्दतेतद्दोषं पश्यंतुनामगुणल्यंतुगुणंगुणज्ञाः आलोकयंतिकिलयेनगुणंनदोषंते
६ साधवः परममापरितोषयंति १९ पूर्णानंदकवेः कृतिर्भगवतोजीवस्यभेदाश्रिता तत्वातत्वविवे
कवाक्यशुभगाश्रीविष्णुभक्तैर्मता माध्वीमुग्धपदप्रबंधमधुरा तत्वगतांप्रस्मतांमोदंभागव
तोत्तमाः मनसिचेद्धत्तोर्भवेद्दुर्लभा २० नानालंकारयुक्तामृदुमधुरपदन्याससंवर्द्धितःश्रीःपी
यूषप्रख्यवाक्यप्रकरसुललिताचारुसर्वांगसंगी चिदानंदैकभूमिर्गुणगणशुभगारोपले
शेनहीना भक्तानांकंठदेशेनिवसतुसततंतत्वमुक्तावलीयं २१ ॐ इतिश्रीगौडपूर्णानंदक
विचक्रवर्त्तिविरचितातत्वमुक्तावलीमायावादशतदूषणीसंपूर्णं संवत १८६८ भाद्रपद
शुक्लपक्षषष्ठी ६ चंद्रदीने लीखतंरवेड्ग्राममध्येसारस्वतब्राह्मणरामजसशुभंभूयात श्री

राम:
६

तुकस्माद्युयदिपरस्मिन्गुरोर्मंदभाग्यायमस्तु १२ स्थूलसूक्ष्मसमस्तजंतुसहितंब्रह्मांडभांडादिकंयत्कोटिव
रमध्यमग्नमणीकश्रेणीवयस्मिन्नमत यस्मिन्ननाप्रलयंचतिष्ठति सर्वंप्राप्नोतियस्मिन्नहोसोहंवाक्य
मिदंमदीयवदनादायातिकस्मात्कुतो १३ यस्यश्रीपरमेश्वरस्यकृपयामूकोपिवाचालतांपंगुःपर्व
तलंघनेकिलमहासामर्थ्यमित्येतितत्क्षणत जन्मांधोप्यरविंदसुंदरदृशोहंहंकिमन्यत्परंवंदेनंदकि
शोरमिंदुवदनंतंभक्तचिंतामणिं १४ कालोनंतःप्रशस्तोपिविश्वमखिलंकुलंमहत महद्गुणग्रहकः
कश्चित्कदाचिद्भविताभुवि १५ श्रीनारायणभट्टवर्यसविधेतद्भक्तिमूलमभिधंसांगोपांगमधीत्य
भक्तकृपयाज्ञात्वारहस्यंव्रजं भक्त्याधारतयाप्रयामतिपरोक्षाकीर्तिवृद्धामपांजीवव्रजानिमेदत
त्वविषयेसद्भावकामुक्तावली १६ यत्प्रमिहयदिदुष्टंप्रोक्तवंतःप्रमादात्तदखिलमपिशुद्धयाशोधयं
तुप्रवीणाःस्खलतिखलुकदाचिज्ज्ञातोहंतपादः क्वचिदपिबतवक्तावक्तिमोहाद्विरुद्धं १७ गुणज्ञ
गुणिकाकोसमुज्जायतिदोषालोनजातुसुखंमलिमयमंदिरमध्यप्राप्यपतितिपिपीलिकाखिद्रं १८ ये

ग० वृ० पत्तेः ननु ब्रह्मसत्तात्मकार्थत्वं प्रमाणप्रमेयत्वादिकस्य पारमार्थिकत्वमंगीकुर्मो वयमिति चेन्न अबाध्य
५ वेलायामेव सर्वस्य मिथ्यात्वेन श्रवणात् तस्यैव च मननात् तत्पारमार्थिकत्वांगीकारस्य किंचित्करत्वा
त् नहि स्वप्नदृष्टव्याघ्रजन्या भयप्राप्तिर्भवति प्रसङ्गेऽपि मिथ्यात्वात् विद्यासनातनावेदप्रदाज्ञापरिपाल
कः मयेति श्रुतिसिद्धाः एवं मिथ्यासंति स्वप्नघनजायंते नन्वेवंती निर्देशोपवं हृत्स्वरूपब्रह्मांडे ब्रह्माण्डं
ति भगवता वेदप्रमाणस्य नित्यत्वप्रतिपादनविरोधाच्च ननु विज्ञानमानंदं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रु
तिभिर्ब्रह्मणो ज्ञानमात्रत्वमेव प्रतिपाद्यते इति चेन्न विज्ञातारमरे केन विजानीयात् नहि विज्ञातुर्विज्ञाते
र्विपरिलोपो विद्यते ज्ञोज्ञराव इत्यादिश्रुतिसहस्रविरोधापत्तेः अतएतदविरोधेनैव विज्ञानमानंदं ब्रह्मेत्यादे
रर्थो वर्णनीयः सोपाधिकत्वनिरुपाधिकत्वयोः पूर्वमेव निरस्तत्वात् ननु सत्यं ज्ञानमनंतमित्यत्र सत्यादि
पदैरनृतजडपरिच्छिन्नव्यावृत्तत्वेन [illegible] ब्रह्मण एकस्यैव प्रतिपादनात्तस्य निर्विशेषत्वं प्रतीयते इति चेन्न
सत्यादिपदानां तत्तत्पदार्थविरोधिव्यावृत्तिमात्रपरत्वे व्यावर्त्यबहुत्वेन व्यावृत्तीनामपि बहुत्वादेकार्थ राम:
पर्यवसानासिद्धेः प्रथमसत्यपदव्युत्पत्तिरेव जडव्यावृत्तिः सैव परिच्छिन्नव्यावृत्तिरित्युच्यते तर्हि सत्यव्या ५

अपसिद्धं तदुक्तमथतः पारार्ज्ञुः ननु एकत्र तयोरसंनित्यमगंधमवत्तं यदिति गंधादिनिषेधः अन्यत्र स
र्वगंधः सर्वरस इति गंधादिविधिः श्रूयते न चैकस्मिन्वस्तुनि विधिनिषेधौ संभवतः अतः कार्यब्रह्म
णि मनोमयत्वादि श्रुतं तु अणुत्वादि इति चेन्न मैवं वक्ष्यति विश्वमेवेदं पुरुषस्तद्विश्वमुप
जीवति सर्वस्य वशी सर्वस्येशानः न तस्येशे कश्चन तस्य नाम महद्यशः परात्परं यन्महतो महांतं न तत्स
मश्चाभ्यधिकश्च दृश्यते न त्वत्समोस्त्यभ्यधिकः कुतोन्यः परं हि पुंडरीकाक्षान्न भूतं न भविष्यति नाराय
णात्परो देवो न भूतो न भविष्यति स विश्वकृद्विश्वविदात्मयोनिः ज्ञः कालकालो गुणी सर्वविद्यः साक्षी चेता
केवलो निर्गुणश्च सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्च
न सत्वाद्यो न संतीशे यत्र च प्राकृता गुणाः इत्यादिश्रुतिस्मृतीतिहासैरनंतकल्याणगुणगणविशिष्टस्य
निखिलहेयप्राकृतगुणरहितस्यैकस्यैव नारायणस्य प्रतिपादनात् तद्व्यतिरिक्तस्याप्रामाणिकत्वाच्च न
यतो वाचो निवर्तंते इति श्रुत्या ब्रह्मणो [illegible] विषयत्वमुक्तमिति चेन्न आनंदं ब्रह्मणो विद्वा
निति ब्रह्मानंदस्य ज्ञानविषयत्वश्रवणाभिधेः [illegible] विषयत्वे ब्रह्मणो प्रामाणिकत्वेन तुच्छत्वा

रा०टी०
८

यतेम्रियते वा चिलक्षितदित्यादिश्रुतिप्रतिपादितयोर्जीवेश्वरयोरपि निषेधादनित्यत्वप्रसंगस्ततश्च पूर्वोक्तश्रुतिविरोधा
पत्तिः हिरुक् नानाचवर्जने इति नानात्वस्य वर्जनेऽपि श्रवणात् अतोयं निषेधः पूर्वोक्तश्रुत्यविरोधेन नेयः
किंच निर्विशेषवस्तुनि प्रमाणमस्ति न वा अस्ति चेत्तर्हि प्रमेयत्वेन तस्य प्रमाणप्रमेययोर्नित्यसंबंधाद्द्वैतभंगः
नास्ति चेत्तर्हि अप्रमाणत्वादनुपादेयत्वं स्यात् तच्च स्वानुभवसिद्धमिति चेत्सत्त्वगोष्ठीसंकेतः इदमहमदर्श
मित्यात्मसाक्षिकेन केनचिद्विशेषेण विशिष्टस्यैवानुभूयमानत्वात् अपरं च श्रवणादिसाधनेभ्यो यज्ज्ञा
नं तन्मोक्षसाधनमिति तवाभिमतं तज्ज्ञानं किमात्मकमिति वक्तव्यं तत्त्वमस्यादिवाक्यजन्यमिति चेन्न वि
धिं विनैव तस्योत्पन्नत्वात् विधेः प्रयोजकत्वमिति चेत्तर्हि विवेकादिचतुष्टयस्यैवेयर्थ्यं श्रोत्रेंद्रियमेव श्र
वणसाधनं येऽद्वैतं चेत्तर्हि वेदांतश्रवणे सर्वाधिकारः स्यात् तस्य सर्वेषां विद्यमानत्वात् ततश्च स्वं भक्तः प्र
मातादिकारी तु शूद्रस्य संगतिः वर्णाश्रमा[illegible]व्यवस्थापि न स्यात् ततश्चापशूद्राधिकरणविरोधोऽपीति स
र्वमसमंजसमेवेति यच्चोक्तं ब्रह्मनिरूपं ज्ञानं जीवगताज्ञानं निवर्त्य स्वयमपि नश्यति य रामः
था मलिनजले प्रक्षिप्तः कतकरेणुः स्वकृतमालिन्यं निवर्त्य स्वयं नश्यतीति तन्न दृष्टांतासंगतेः तत्र ८

नादिमया तस्माभिः प्रबोधदर्शनादविद्यात्मकस्यापि वाक्यजन्यज्ञानस्य मिथ्यारूपबंधनिवर्तकत्व
संभवात्तन्निवृत्तिपर्यंतं पारमार्थिकः जीवब्रह्मणोः स्वरूपैक्यरूपो मोक्षः प्रतिपन्न इति चेन्न अदृष्टद्वारता
ज्ञानवान्भवानुपजायते इत्यादिप्रमाणात् स्वाप्नगजादिज्ञानस्यैव प्रबोधकारणं गजादिविषयस्य प्रबोधकार
णभावात् किंच शशविषाणादिवत्स्वरूपेणासतः प्रपंचस्यानवरूपारोपसंभवः अन्यत्रसतएवान्यत्रा
रोपनियमात् प्रमापर्यंतमेवाहि भ्रमो दृष्टः शुक्तिरजतादिषु न चारोपः सविषयस्य प्रतीतिमात्रमपेक्षते न सत्त्व
मपीति चेन्न प्रतीतेरप्यसतः शशशृंगादेरिवासंभवात् किंच ब्रह्मैवस्वाविद्यया जगदाकारं जातमिति चेत्तर्हि
जगतश्चिदचिन्मिश्रितत्वेन चिदचिदात्मकत्वदर्शनाद्ब्रह्मणि जडत्वापत्तिः स्यात् अज्ञत्वादयो दोषास्तस्मिन्न
प्रसज्येरन् ततश्च निष्कलं निष्क्रियं शांतं निरवद्यमित्यादिश्रुतिविरोधः किंच दृष्टांतासंगतिश्च कथमिति चे
त् तत्र शरीरविशिष्टस्यैव लूतायाश्चेतनत्वेन तंतुकार्यं प्रत्युपादानत्वं तत्र परिणामादयः शरीरगता न
चेतने ते परमार्थाः अत्र तु ब्रह्मैव भ्रांतं जगद्रूपेणाभातमिति तं प्रत्युक्तदोषास्तस्मिन्नेव प्रसज्यंते अन्यच्च नेह
नानेत्यत्र चिदचिन्मिश्रस्य सर्वस्य जगतो निषेधे नित्यानित्यानां चेतनाचेतनानां ज्ञाज्ञौ द्वावजावीशनीशावजा

रा०दू०
६

नसत्यत्वासत्यत्वयोर्विरोधः सामानाधिकरण्यभंगरूपो दोषः प्रसज्यतोऽपि निष्ठ इति चेन्न नीलमुत्पलमित्या
दौ गुणजातिरूपयोर्नीलानीलपदार्थयोरेकार्थसमन्वयदर्शनाद्दृष्टान्तेऽपि सत्यत्वासत्यत्वयोः समन्वये
विरोधाभावात् तच्च तु जडस्याविद्यापरिच्छिन्नत्वात् तयोरसत्यत्वात् स्वविशेषेण निमित्तैक्ये सति पदान्तरवै
यर्थ्यं विशेषे च निमित्तभेदेनाखंडार्थपरत्वहानिप्रसक्त्यादेवेति अतः सत्यत्वादीनां विशेषणत्वमंगीकार्यं
अन्यथाऽनन्तादिभ्यो व्यावर्त्तनं स्यात् व्यावर्त्तकाभावात् ननु विज्ञानमानंदं ब्रह्म आनंदो ब्रह्म सर्वं खल्
विदं ब्रह्म तदात्मानं स्वयमकुरुत इदं सर्वं यदयमात्मा नेह नानास्ति किंचनेत्यादिश्रुतिवाक्यैः कू
टस्थनित्यचैतन्यमात्रं ब्रह्मैवानाद्यविद्यया तिरोहितं स्वगतनानात्वं पश्यतीति चेन्न तदसत् प्रकाशपर्याय
स्य ज्ञानस्य तिरोधानाभावात् स्वप्रकाशस्वरूपस्य निरंशस्य तिरोधाने च स्वस्वरूपनाशप्रसंगात् किंच स
र्वस्य मिथ्यात्वे तत्त्वमस्यादिवाक्यजन्यज्ञानस्य बंधनिवर्त्तकत्वं न स्यात् अविद्याकार्यत्वात्तस्य स्वयमवि
द्यात्मकत्वात् अविद्याकल्पितज्ञातृज्ञानाश्रितत्वात् कल्पिताचार्यादिप्रमाणजन्यत्वाद्दुष्टपूर्वबंधनिवर्त्तकवाक्य
जन्यज्ञानवत् अतएव जीवन्मुक्तत्वमपि त्वदभिमतं न स्यात् कारणाभावे कार्योत्पत्त्यनुपपत्तेः ननु सर्वप्रा

राम:
६

त्रे २ वच्छिरित्थं नैव जडमात्रान्ये परिछिन्न व्यावृत्ततया स्वरूपप्रतिपत्तेः पर्यायांतरत्वैपर्य्यापत्तिः स्यात् नतु
व्यावर्त्यनामनृतादीनामेकत्वेपि तद्व्यावृत्तत्वाद्याकारभेदान्न पर्यायांतरत्वैपर्य्यमिति चेन्न व्याका
राणां परस्परभेदे तद्द्वतोपि भेदेनैवभावितव्यमिति त्वयैव साधितत्वात् तदनुपगमे च जडपरिछिन्न
योरसत्यव्यावृत्तत्वेन ब्रह्मवद्वाच्यार्हत्वाद्द्वैतभंगः यदि तन्न त्यदार्थव्यावृत्तस्वव छिन्नस्वरूपपरत्वे
नसत्यादीनामेकार्थत्वमिष्यते तदा व्यावृत्तीनां स्वरूपावछेदकत्वेन स्वरूपस्य सविशेषत्वप्रसं
गः इति किं च सत्यादीनां ब्रह्मणि प्रवृत्तौ सत्यत्वादिनिमित्तभावे सामानाधिकरण्यभंगः भिन्नप्रवृत्ति
निमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति हि तल्लक्षणं किं च सत्यपदार्थप्रतिपत्तिर
सत्यपदार्थप्रतिपत्तिमपेक्षते असत्यपदार्थप्रतिपत्तिः सत्यपदार्थप्रतिपत्तिमपेक्षते इति परस्पराश्रयदोषः
अपि च व्यावृत्तय उपलक्षणत्वेन विशेषणत्वेन वा ब्रह्म लक्षयंति तत्राद्ये उपलक्ष्याकारवत्तया ब्रह्म
णः सविशेषत्वं द्वितीयेपि विशेष्याणि मानस्य तद्धर्मस्यैव विशेषणत्वेन तद्वत्तया सविशेषत्वमेवेति नतु
ज्ञानत्वानंतत्वयोः सत्यत्वान्तत्वेनिमित्तभेदाभावेन पर्यायांतरत्वैयर्थ्यं अन्यन्नेवासत्यत्वावश्यंभावे

रात० यन्मनोरथ इतिव्याख्यातमत्रस्फुटं ८५ सकलमिदमहंचवुलभतंयदिस्यामहहखलुत
७· दास्यादावयोरैक्यमेव तवस्ततघनदारामामकीनात्तदास्यमर्भमवतवमवेयुर्नावयोरस्ति
भेदः ८६ विधिनिषेधश्चतदाकथंस्यादैक्यंयतोनास्तिचवर्णभेदः निर्णीतमद्वैतमतंत्वयाच
द्वैद्वैसदाकोविहितोपराधः ८७ भूतेंद्रियांतःकरणात्प्रधानात्जीवाभिधानादपिभिन्नआत्मा
इतीरितोभागवतेतृतीयस्कंधेपुरस्तात्कपिलेनमातुः ८८ ध्यायंतिरूपद्विपदवीमालं
अभ्यन्यालयेअन्यांतःकरणेनअन्यमपिलंअन्यंचतद्दैवतं किंवाच्यंवहुतत्रअन्यविषये
नोवाक्प्रवृत्तिर्यतस्तेषांमन्यधियांभवेत्फलमपिप्रायेणअन्यंखलु ८९ अन्यवादस्यनिं
दायांभारतेव्यासभाषितंतेषांतमःशरीराणांतमएवपरायणं ९० कपिलेनयदुद्दिष्टंस्मम
रस्मिपुरःपुरा तदेवभारतेपश्चाद्व्यासेनसमुदाहृतं ९१ नैर्गुण्यमेवारोप्यगुणसागरेपितेषांम।
होजंदुरिकाप्रवाहः सउअस्यभावंयपश्येवञ्चात्वाप्रतारयंतिस्वमतप्रपन्नान् ९२ हेसर्वपंचकर्ण रामः
त्वत्ठखाःसमयाःनित्यागुणास्तेपरमेश्वरस्य श्रुतोगुणीनिर्गुणस्वकस्मान्नैर्गुण्ययादस्तविषाद ७

न्यभेदं भेदं ततो न्यमनुभवन्ति विविधं विचित्रं ७८ स्वातंत्र्ययोग्याद्भवति स्वतंत्रो विश्वस्य कर्त्ता जगदी
श्वरोयः जीवः पराधीनतया प्रसिद्धः कस्मात्तयोरैक्यमहो वदंति ७९ नानारसा मधुनि भिन्नतया तरू
णां संति त्रिदोषहरणं कथमन्यथा स्यात् जीवास्तथा भगवति प्रलये विलीना नैक्यं गताः खलु य
तः पृथगेव सृष्टौ ८० नदीसमुद्रयोर्भेदः क्षुद्रो दलवणोदयोः तथा जीवेश्वरौ भिन्नौ विलक्ष
णगुणान्वितौ ८१ नद्यः समुद्रे मिलिताः समंतान्नैक्यं गता भिन्नतया न भांति क्षीरोदकं दुग्धदक
योर्विभेदा दृश्येते तयोर्वास्तवरावभेदः ८२ दुग्धे तोयं मिलितमपरे नैव पश्यंति भेदं हंसस्ताव
त्सपदि कुरुते क्षीरनीरस्य भेदं एवं जीवात्मपरब्रह्मणोर्मेलिनामज्ञो भेदं विदधति
गुरोर्वाक्यमासाद्य सद्यः ८३ दुग्धं दुग्धे जलमपि जले मिश्रितं सर्वथा तन्नैक्यं नूनं नियत
मुभयोर्मानमस्त्येव यस्मात् एवं जीवाः परमपुरुषे ध्यानयोगाद्विलीना नैक्यं प्राप्ता विमल
मतयः संत एवं वदंति ८४ केचिद्वादबलाः कुतर्कजलधौ मग्नाः कुमार्गे रताः मिथ्याजल्पनैक
स्वनाद्यांतयुता भ्रांता जगद्भ्रामकाः ब्रह्मैवाहमिदं चराचरमपि ब्रह्मैव दृश्याखिलं प्राकुर्वन्

रा०दू० आभासासंभव इति चेन्मैवं अपि च मायाया जडत्वात्तस्यास्तयोश्चेतनस्तयोः कार्यत्वमसंभवपराहतं यदीश्व
८ स्य मायाकल्पितत्वं ब्रूषे तर्हि मायाविंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वर इति वचनं वंध्या मे जननीतिवद्व्याहतमे
व कार्यस्य कारणवशीकर्तृत्वासंभवात् नहि शुक्तौ कल्पितं रजतं द्रष्टुर्ज्ञानं वशीकरोतीति ननु रजतस्य
जडत्वात् वशीकरणाभावः ईश्वरस्य तु चेतनत्वाद्भवत्येव मायावशीकरणत्वमिति चेन्न हि जीवस्यापि मा
यावशीकरणत्वं स्यात् तस्यापि चेतनत्वात् मायाकल्पितत्वाविशेषाच्चेति यत्तूक्तं ज्ञातृत्वादिमन्यं चेत
नमात्मानमनुभवति स्वरूपमात्मानमहंकारः स्वात्मस्थमेवाभिव्यनक्ति मुखमादर्शादिवदिति तदुपहास्यमेव स्व
यंज्योतिष आत्मनो जडरूपाहंकाराभिव्यंग्यत्वस्यासंभवपराहतत्वात् तदुक्तंणांतांगारवदित्यमहंकारो
जडात्मकः स्वयंज्योतिषमात्मानं व्यनक्तीति नपुनक्तिमादिति अन्यथानुभवति स्वरूपस्यात्मनो हंकाराभि
व्यंग्यत्वे तस्यानुभवतित्वप्रसंगः स्यात् तदप्युक्तं व्यंजकव्यंग्यत्वमन्योन्यं न घस्याप्रातिकूल्यतः व्यंग्यत्वेन
नुभवतित्वमात्मनि स्याद्यथा घटे इति अतः सर्वेषां पदार्थानां स्वयंप्रकाशानुभवतिसिद्ध्यधीनत्वात्तामेवाहंका रामः
राभिव्यनक्तीत्युपहासास्पदमेवेति नन्वौपाधिकभेदविषयाभेदश्रुतयः पारमार्थिकाभेदविषयाश्चाभेदश्रु ८

हिकतकरेणुरयंचमालिन्यंघटस्थजलेकरोतितिष्ठति एवमत्रापिब्रह्मणिक्वचिद्दोषःस्वरूपज्ञानसा
विघातकाश्चसत्वेसतिचेतन्याविद्ययोः सांकर्यमेवनोचेद्दृष्टांतासंगतिः यदुक्तंमायाभासेनजीवेशौकरोती
तिश्रुतेर्जीवेश्वरयोर्मायाकल्पितत्वंप्रतीयते इतितदप्यसमंजसं कथमितिचेत् सकारणंकरणाधिपाधिपोन
चास्यकश्चिज्जनितानचाधिपः मत्तःपरतरंनान्यत्किंचिदस्तिधनंजयेत्यादिश्रुतिस्मृतिभिः सर्वजगत्कार
णत्वेनप्रतिपादितस्येश्वरस्यकुत्रापिकार्यत्वेनाश्रुतत्वात् तज्जनयितृत्वाधिपत्वयोरत्यंताभावप्रतिपा
दनाच्च अन्यथानित्योनित्यानांब्रह्मनादिरनंतश्च द्वावजावीशनीशावित्यादिश्रुतिभिर्नित्यत्वेनाद्यनंतत्वेन
चोक्तयोर्जीवेश्वरयोरादिमत्वेनानित्यत्वप्रसंगात् तत्रतयोर्नित्यत्वप्रतिपादकश्रुतिस्मृतयोदत्तजलांजल
यस्युरिति किंचसाकिमाश्रित्यजीवेश्वरौकल्पयतिनतावत्तावेवाश्रित्यतत्कल्पितत्वेनतयोः पश्चाद्भावि
त्वात् अतोब्रह्माश्रित्येतिवक्तव्यं तर्हिपूर्वमेवमायासवलितंब्रह्मेति अकर्तृब्रह्मेतिवदतोव्याघातः अपरंचमा
यायाअविद्यारूपत्वाभिमतत्वात्तस्याः कल्पकंवक्तव्यं स्वतःसिद्धासेतिचेन्नहिद्वैतापत्तिःस्वोक्तव्याघातः अ
ज्ञानांतरंकल्पकमितिचेत्तस्याधिकल्पकमन्वेषणीयं तथातस्यापीत्यनवस्थास्यात् निर्विषयस्यब्रह्मण

दू० माण्यत्वं स्यात् ततोद्वैतमात्रस्याप्रमाणत्वं स्यात् ननु आत्मैवेदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादिना ब्रह्मात्मैक्यज्ञाने

नैवाविद्यानिवृत्तेस्तत्प्रयुक्तस्य दुःखादेर्मिथ्यात्वं प्रतीयते इति चेन्न दुःखस्य पुण्यापुण्यरूपकर्मनिमित्तस्य

दुःखानुभवस्य मिथ्यात्वाभावात् भवदभिमतैक्यज्ञानस्य परमार्थवस्तुविपरीतविषयस्य मिथ्यात्वेन

बंधविच्छेदैककारणत्वात् अपि च भवदभिमतस्य बंधनिवर्त्तकज्ञानस्यापि मिथ्यारूपत्वात्तस्यानि

वर्त्तकांतरमन्वेषणीयं ततस्तत्त्वज्ञानज्ञेययोर्नित्यत्वप्रसंगस्य भवदनिष्टत्वात् तत्परिजिहीर्षया नि

वर्त्तकांतरे तस्यापि तथैवानवस्थापत्तेश्च ननु यस्तस्मिन्नानिर्देश्ये नात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विंद

ति सोभयं गतो भवति य एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति श्रुतेर्भेदं कुर्वतो भयश्रवणात् कथं जीव

ब्रह्मणोर्भेदे आग्रह इति चेन्न तत्र भेदस्वरूपानभिज्ञत्वविजृंभितं तथाहि अत्र त्वनिष्टभेदो निराक्रियते न

तु अत्यंतरूपः शरीरशरीरिभावरूपो भेदः अन्यथा ज्ञाज्ञौ सह्यनादिरनंतस्य रोमो हि परमात्मनः भेदव्यपदेशाच्चा

न्यः नेतरोनुपपत्तेः स्थित्यदनाभ्यां च अधिकं तु भेदनिर्देशात् यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः इत्या रामः

दि श्रुतिस्मृतिसूत्रविरोधः स्यात् किंच तस्यामेव श्रुतौ अभयं प्रतिष्ठां स्थितिं विंदतीति आधाराधेयश्रव ११

तथ त्वंगीकार्यं अन्यथा एको देवः सर्वभूतेषु गूढः सर्वव्यापीत्यादिश्रुतिविरोध इति चेन्न विकल्पासा
सहत्वात् किं स्वभावतः स्वस्मादभिन्नं जीवमनुपहितं ब्रह्म जानाति न वेति न जानाति चेत् तर्हि सर्वज्ञत्व
हानिः जानाति चेत् स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणादिदोषप्रसंगो
निर्वार्यः जीवब्रह्मणोरज्ञानकृतो भेदस्तद्विषया भेदश्रुतिरिति चेदयमपि विकल्पः किं तदज्ञानं जीवगतं
ब्रह्मगतं वा जीवगतत्वे पूर्वोक्तो दोषः तस्यैवाज्ञानकल्पितत्वात् नहि शुक्तौ कल्पितरजतस्य मज्ञा
नं किंतु द्रष्टृपुरुषनिष्ठं ब्रह्मगतत्वे स्वप्रकाशज्ञानस्वरूपस्य ब्रह्मणो ज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न सं
भवति अज्ञत्वात् तस्य ननु मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं
विजानीयादित्यादिभिर्भेदं पश्यतो नर्थश्रवणात् कथं द्वैतस्य सत्यत्वमिति चेत् तत् श्रुत्यर्थानभिज्ञत्वनिबंध
नं सर्वस्य ब्रह्मकार्यत्वात् ब्रह्मात्मकत्वेनाब्रह्मात्मकस्य श्रुत्या निषिध्यमानत्वात् अन्यथा सोऽकामयत ब
हुस्यां तदैक्षत बहुस्यां तन्नामरूपाभ्यां व्याक्रियते इत्यादिश्रुतिभिः स्वसंकल्पकृतनानात्वप्रतिपादनविरोधा
त् नहि श्रुतमेन वेदेन स्थिरचररूपेण ब्रह्मणो नानात्वं प्रतिपाद्य पुनस्तदेव निषिध्यते तथा सति वेदस्या

रा० टू० श्रुतेरर्थोऽनुक्तस्य ब्रह्मसाम्यप्रतिपादकश्रुत्याद्यविरोधेनैव संगमनीय स्तथा सति तत्वसिद्धांतभंग इत्युभयतः पा
१० शारज्जुरिति ननु यदा सर्वे प्रमुच्यंते कामा येस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति विदुषोऽत्रै
वाऽमृतत्वश्रुतेः कथं देहपातेन परस्य ब्रह्मप्राप्तिरुपपद्यते इति चेन्न एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्यो
तिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते शतं चैका हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृत
त्वमेती ऊर्ध्वमेव स्थितस्तेषां योऽभिनासर्यमिंदुलं ब्रह्मलोकमतिक्रम्य तेन याति परां गतिमित्यादिश्रुतिस्मृतिवि
रोधात अतएतदविरोधेनैव तस्याः श्रुतेरर्थो वर्णनीयः ननु भवत्वेवं श्रुतीनां सालोक्यादौ सार्ष्टिकं सायुज्यरूपे
मोक्षे तु ब्रह्मविद्ब्रह्मैवेति श्रुतेः सायुज्यमिति चेन्न धात्वर्थनिरुक्तिविरोधात सह युनक्तीति सयुक् सयुजोभा
वः सायुज्यमिति शाब्दोक्तेः सोऽश्नुते सर्वान्कामान सह ब्रह्मणा विपश्चितेत्यस्यानुगुण्येनैव भोगसाम्यवाच
स्यात अन्यथा आदित्यस्य सायुज्यं गच्छति एतासां देवतानां सायुज्यं गच्छतीत्यादिश्रुतिप्रतिपादिततत्तद्देवतास्वरूपै
क्यप्रसंगात सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः किंकरा मम ते सर्वे भवंति निरुपद्रवाः यत्र यत्र हरेपार्श्वे रा०
यादुकैवायतऊहं आद्यायनासः सायुज्यं मोक्ष इत्यभिधीयते इत्यादिवाक्येष्वपि भोगसाम्यप्रतिपादवै ११

त शरीरशारिसंबंधस्त्वप्रतीयते अनिर्देश्येचिदचित्सजातीयतयानिर्देष्टुमशक्ये यस्याव्यक्तं ज्ञानस्या
योव्यक्तमंतरेसंचरन यस्यात्माशरीरं यआत्मानमंतरोयमयतीत्यादिभिर्वैलक्षण्यप्रतिपादनात अन
न्येप्राकृतशरीररहिते आदित्यवर्णं तमसःपरस्तात नतस्यप्राकृतामूर्तिर्मांसमेदोस्थिसंभवेतिश्रुतिस्मृ
ती अनिरुद्धेअनंतमहिम्नि यतोवाचोनिवर्तंते अप्राप्यमनसासहेतिश्रुते महिम्नःपारमप्राप्येत्यर्थः अ
निलयनेअनाधारे सर्वमनाधारमात्माधारोखिलाश्रय इत्यादिप्रमाणात इदृशेपरमात्मनि यःप्रतिबं
विंदतिसोभयंततोभवतीतिश्रुतेरर्थः ननुब्रह्मविद्ब्रह्मैवभवतीतिश्रुतिबलान्मोक्षेजीवब्रह्मणोः स्वरूपैक्यं
प्रतीयतेइतिचेन्न तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैति परंज्योतिरूपसंपद्यस्वेनरूपे
णाभिनिष्पद्यते जगद्व्यापारवर्ज्यं भोगमात्रसाम्यलिंगाच्च ममसाधर्म्यमागता इत्यादिश्रुतिस्मृतिस्वार
स्यभंगात तत्पुरुषोमानवः सएतान्ब्रह्मगमयतीतिवेदुतेनपुरुषेण अर्चिरादिमार्गेण ब्रह्मप्राप्तिश्रवणविरो
धात् दृश्यत्वामुक्तस्वरूपभंगोपगमात मुक्तेरपुरुषार्थत्वात ताद्दशमोक्षस्वरूपज्ञानानंतरंपरीक्षकाणांमु
मुक्षोर्मोक्षसाधनप्रवृत्त्यनुपपत्तेश्च नहिकश्चिदनन्यज्ञःस्वनाशाय स्वयमेवप्रयतते अतोब्रह्मविद्ब्रह्मैवभवतीति

श०दू०
११

शेषायत्तेश्च अतोब्रह्मविद्भिर्नैवेतिश्रुतेर्मूकस्यचूलसाम्यरवाचारस्यमित्यलंदिक्षु हतउ
घातेनेति एवंसहस्रावधिदूषणानिसंति मयातुस्वालीशिक्ष्यमायेनदिङ्मात्रमुक्तमिति
आलोउअदेशिकग्रंथानविचार्यचपुनःपुनःदूषणानांघातंदत्तंकेवलाद्वैतदर्शने ॥ इति
श्रीमन्नारायणचरणनलिनद्विरेफाणांवादीभकेशरिणांश्रीमद्वेंकटाचार्याणांचरणार
विंदमधुपेनश्रीनिवासदासेनविरचितायांशतदूषण्यांसमाप्तिमगात संवत १८६४ श्री
आश्विनेकृष्णपक्षेतृतीयायांगुरुवासरे लीषतंरामदासेनपुस्तकंशतदूषणी शुभंभूयात्

रामः
११

प्रातद्रुः क्षा



10